वैयाकरणसिद्धान्तकौमुदी

अजन्तपुँल्लिङ्गप्रकरणम् (२६)

२५.०३.२०११

- सखायम् इच्छति सखीयति ।
- ततः क्विप् । अल्लोपयलोपौ ।
- सखि (क्यच्) य (‘सुप आत्मनः क्यच्’- ३.१.८ – इति क्यच्प्रत्ययः)
- सखीय (‘अकृत्सार्वधातुकयोर्दीर्घः’ – ७.४.२५)
- सखीय (‘सनाद्यन्ता धातवः’ – ३.१.३२ – इति धातुसंज्ञा)
- सखीय (क्विप्) व् (‘क्विप् च’ – ३.२.७६)
- सखीय् व् (‘अतो लोपः’ – ६.४.४८ - इत्यकारलोपः)
- सखी व् (‘लोपो व्योर्वलि’ – ६.१.६६)
- अल्लोपस्य स्थानिवत्त्वाद् यणि प्राप्ते

क्वौ लुप्तं न स्थानिवत् (वा)

- क्विप्-प्रत्ययपरको लोपो न स्थानिवत् ।

- सखी व्
- सखी (‘वेरपृक्तस्य’ – ६.१.६७)
- एकदेशविकृतस्य अनन्यतया अनङ्-णित्त्वे ।
- सखा सखायौ सखायः

- हे सखीः

- अमि पूर्वरूपात् परत्वाद् यणि प्राप्ते, ततोऽपि परत्वात् ‘सख्युरसम्बुद्धौ’ (७.१.९२) इति प्रवर्तते ।
- सखायम्　　　सखायौ
- शसि यण्, सख्यः ।

- सह खेन वर्तत इति सखः, तम् इच्छति इति सखीः ।
- सुखम् इच्छति इति सुखीः ।
- सुतम् इच्छति इति सुतीः ।
- सख्यौ । सुख्यौ । सुत्यौ ।
- ‘ख्यत्यात्...’ इति दीर्घस्यापि ग्रहणाद् उकारः ।
- सख्युः, सुख्युः, सुत्युः ।

ईकारान्तः पुँल्लिङ्गः सखीशब्दः
(सखाय

	एकवचनम्		बहुवचनम्
प्रथमाविभक्तिः	सखा	सखा	सखायः
सम्बोधनप्रथमाविभक्तिः	हे सखीः	हे सखायौ	हे सखायः
	सखायम्	सखायौ	सख्यः
	सख्या	सखीभ्याम्	सखीभिः
	सख्ये		सखीभ्यः
	सख्युः		सखीभ्यः
षष्ठीविभक्तिः	सख्युः		सख्याम्
सप्तमीविभक्तिः	सख्यि		सखीषु

सर्वनामस्थानेषु
एकदेशविकृतन्यायेन
अनङ्-णित्त्वे

अन्यत्र अजादिषु
प्रत्ययेषु
'एरनेकाचः...' इति
यण्

ङसिङसोः
'ख्यत्यात्परस्य'
इति उत्वम्

ईकारान्तः पुँल्लिङ्गः सखीशब्दः (सखम् इच्छति)

	एकवचनम्	द्विवचनम्	
प्रथमाविभक्तिः	सखीः	सख्यौ	सख्यः
सम्बोधनप्रथमाविभक्तिः	हे सखीः	हे सख्यौ	हे सख्यः
द्वितीयाविभक्तिः	सख्यम्	सख्यौ	सख्यः
तृतीयाविभक्तिः	सख्या	सखीभ्याम्	सखीभिः
चतुर्थीविभक्तिः	सख्ये	[illegible]	सखीभ्यः
पञ्चमीविभक्तिः	सख्युः		सखीभ्यः
षष्ठीविभक्तिः	सख्युः		सख्याम्
सप्तमीविभक्तिः	सख्यि		सखीषु

सर्वत्र अजादिषु प्रत्ययेषु ‘एरनेकाचः…’ इति यण्

ङसिङसोः ‘ख्यत्यात्परस्य’ इति उत्वम्

- लूनम् इच्छति इति लूनीः ।
- लूञ् लवने
- लू + (क्त) त ('निष्ठा' – ३.२.१०२ – इति भूते क्तप्रत्ययः)
- लून ('ल्वादिभ्यः' – ८.२.४४ – इति नत्वम्)
- लून (क्यच्) य ('सुप आत्मनः क्यच्' – ३.१.८)
- लूनी य ('क्यचि च' – ७.४.३३ – इति ईत्वम्)
- लूनीय (क्विप्) व् ('क्विप् च' – ३.२.७६)
- लूनीय् व् ('अतो लोपः' – ६.४.४८ - इत्यकारलोपः)
- लूनी व् ('लोपो व्योर्वलि' – ६.१.६६ – इति यलोपः)
- लूनी ('वेरपृक्तस्य' – ६.१.६७ – इति वलोपः)

- क्षामम् इच्छति इति क्षामीः ।
- क्षै क्षये ।
- क्षा   ('आदेच उपदेशेऽशिति' – ६.१.४५ – इति आत्वम्)
- क्षा   (क्त) त ('निष्ठा' – ३.२.१०२)
- क्षा   म ('क्षायो मः' – ८.२.५३)
- क्षामी

- प्रस्तीमम् इच्छति इति प्रस्तीमीः ।
- प्र+ष्ट्यै शब्दसङ्घाते
- प्र स्त्या ('आदेच उपदेशेऽशिति' – ६.१.४५)
- प्र स्त्या (क्त) त ('निष्ठा' – ३.२.१०२)
- प्र स्त्या म ('प्रस्त्योऽन्यतरस्याम्' – ८.२.५४)
- प्र स्त् इ आ म ('स्त्यः प्रपूर्वस्य' – ६.१.२३ - इति सम्प्रसारणम्)
- प्र स्ति म ('सम्प्रसारणाच्च' –६.१.१०८ - इति पूर्वरूपम्)
- प्रस्तीम ('हलः' - ६.४.२ – इति दीर्घः)
- प्रस्तीमी

☙ एषां ङसिङसोः यण् ।

☙ नत्वमत्वयोः असिद्धत्वात् ‘ख्यत्यात् …’ इति उत्वम् ।

☙ लून्युः, क्षाम्युः, प्रस्तीम्युः ।

☙ शुष्कीयतेः क्विप् । शुष्कीः । ‘शुषः कः’ (८.२.५१) इति तस्य कः ।

☙ पक्वीः । ‘पचो वः’ (८.२.५२) इति तस्य वः ।

☙ इयङ् । शुष्कियौ, शुष्कियः ।

☙ संयोगपूर्वकत्वान्न यण् ।

☙ ङसिङसोः शुष्कियः इत्यादि ।

☙ कत्व-वत्वयोः असिद्धत्वेऽपि कृतयणादेशत्वाभावाद् न उत्वम् ।

ईकारान्ताः पुँल्लिङ्गाः

प्रथमो विधः – अनदीसंज्ञकः, अधातुः

- ‘इको यणचि’ – इति यणादेशः, अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घः, ङौ सवर्णदीर्घः ।
- उदा: औणादिकः ‘वातप्रमी’ शब्दः

द्वितीयो विधः – नदीसंज्ञकः, अधातुः

- सम्बुद्धिह्रस्वः, ङित्सु आडागमः, आमि नुडागमः, ङेः आमादेशः ।
- ‘इको यणचि’ – इति यणादेशः, अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घः , ङौ सवर्णदीर्घः ।
- उदा: बहुश्रेयसी (ङ्यन्तत्वात् सुलोपः), अतिलक्ष्मीः (अङ्यन्तत्वात् न सुलोपः)

ईकारान्ताः पुँल्लिङ्गाः

- तृतीयो विधः – अनदीसंज्ञकः, धातुः (असंयोगपूर्वकः इकारः, अनेकाच् अङ्गम्)
  - सर्वत्र अजादिषु प्रत्ययेषु ‘एरनेकाचोऽसंयोगपूर्वस्य’ इति यणादेशः । (अमि पूर्वरूपं, शसि पूर्वसवर्णदीर्घं, ङौ सवर्णदीर्घं च बाधित्वा)
  - उदा: प्रध्यायतीति प्रधीः, वातप्रमीः (क्विबन्तः), उन्नीः (ङेः आमादेशः विशेषः), ग्रामणीः (ङेः आमादेशः विशेषः),
  - सखा (सखायमिच्छति – अनङ्णित्त्वे, ङसिङसोरुत्त्वम्), सखीः, सुखीः, सुतीः, लूनीः, क्षामीः, प्रस्तीमीः (ङसिङसोरुत्त्वम्)

ईकारान्ताः पुँल्लिङ्गाः

- चतुर्थो विधः – नदीसंज्ञकः, धातुः (असंयोगपूर्वकः इकारः, अनेकाच् अङ्गम्)
  - सम्बुद्धिह्रस्वः, ङित्सु आडागमः, आमि नुडागमः, ङेः आमादेशः ।
  - सर्वत्र अजादिषु प्रत्ययेषु 'एरनेकाचोऽसंयोगपूर्वस्य' इति यणादेशः । (अमि पूर्वरूपं, शसि पूर्वसवर्णदीर्घं, ङौ सवर्णदीर्घं च बाधित्वा)
  - उदा: कुमारी (ङ्यन्तत्वात् सुलोपः), प्रकृष्टा धीः यस्य सः प्रधीः (अङ्यन्तत्वान्न सुलोपः)

ईकारान्ताः पुँल्लिङ्गाः

- पञ्चमो विधः - अनदीसंज्ञकः, धातुः (संयोगपूर्वक इकारः/एकाज् अङ्गम्/गति-कारकेतरपूर्वकः/सुधीशब्दः)
  - सर्वत्र अजादिषु प्रत्ययेषु 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङादेशः । (अमि पूर्वरूपं, शसि पूर्वसवर्णदीर्घं, ङौ सवर्णदीर्घं च बाधित्वा)
  - उदा: नीः (ङेः आमादेशः विशेषः), सुश्रीः, यवक्रीः (अज्व्यन्तत्वान्न सुलोपः), सुधीः, शुष्कीः, पक्वीः

ईकारान्ताः पुँल्लिङ्गाः

- षष्ठो विधः – नदीसंज्ञकः, धातुः (संयोगपूर्वक इकारः/एकाज् अङ्गम्/गति-कारकेतरपूर्वकः)
  - सम्बुद्धिह्रस्वः, ङित्सु आडागमः, आमि नुडागमः, ङेः आमादेशः ।
  - सर्वत्र अजादिषु प्रत्ययेषु 'अचिश्नुधातुभ्रुवां य्वोरियङुवङौ' इति इयङादेशः । (अमि पूर्वरूपं, शसि पूर्वसवर्णदीर्घं, ङौ सवर्णदीर्घं च बाधित्वा)
  - उदा : शुद्धधीः, परमधीः, दुर्धीः, वृश्चिकभीः